# भुवनेश्वरीस्तुतिः

प्रसीद प्रपञ्चस्वरूपे प्रधाने प्रकृत्यात्मिके प्राणिनां प्राणसंज्ञे।
प्रणोतुं प्रभो प्रारभे प्रालिस्त्वां प्रकृत्याप्रतर्क्यप्रकामप्रवृत्ते।।1।।
स्तुतिर्वाक्यबद्धा पदात्मैव वाक्यं ध्रुवं त्वां त्वमेवाक्षरैस्त्वन्मयैः
स्तौष्यतस्त्वन्मयी वाक्प्रवृत्तिर्यतः स्यात्।।2।।
अजाधोक्षजत्रीक्षणाचापि रूपं परं नाभिजानन्ति मायामयं ते।
स्तुवन्तीशि तां त्वाममी स्थूलरूपां तदेतावरम्बेह युक्तं ममापि।।3।।
नमस्ते महत्वं प्रपन्ने प्रधाने नमस्ते त्वहटारतत्वस्वरूपे।।4।।
नमः शब्दरूपे नमो व्योमरूपे नमः स्पर्शरूपे नमो वायुरूपे।
नमो रूपतेजोरसाम्भः स्वरूपे नमस्तेऽस्तु गन्धात्मिके भूस्वरूपे।।5।।
नमः श्रोत्रचर्माक्षि जिह्वाख्य–नासास्य–वाक्–पाणिपत्पायु– सोपस्थरूपे।
मनो बुद्ध्यहटारचित्तस्वरूपे विरूपे नमस्ते विभो विश्वरूपे।6।।
रवित्वेन भूत्वान्तरात्मा दधासि प्रजाचेन्द्रम स्त्वेन पुष्णासि भूयः।
दहस्यग्निमूर्ति दधत्वाहुतिं वा महादेवि तेजस्त्रयं त्वत्त एवं।।7।।
चतुर्वक्त्रयुक्ता लसद्धसवाहा रजःसंश्रिता ब्रह्मसंज्ञां दधाना।
जगत्सृष्टिकार्या जगन्मातृरूपे वरं त्वत्पदं ध्यायसीशि त्वमेव।।8।।
विराजत्किरीटा लसच्छॅचक्रा बहन्ती च नारायणाख्यां जगत्सु।
गुणं सत्वमास्थाय विश्वस्थितिं यः करोतीह सोंऽशोऽपि देवि त्वमेव।9।।
जटाबद्धचन्द्राहिगगं त्रिनेत्रां जगत्संहरन्ती च कल्पावसने।
तमः संश्रितां रुद्रसंज्ञां दधाना वहन्ती परश्वक्षमाले विभासि।।10।।
सचिन्ताक्षमाला सुधाकुम्भलेखाधरा त्रीक्षणार्धेन्दुराजत् कपर्दा।
सुशुक्लांशुकाकल्पदेहा सरस्वत्यपि त्वन्मयैवेशि वाचामधीशा।।11।।
लसच्छॅचक्रा चलद्खग्चक्रा चद्खग्भीमानदत् सिंहवाहा ज्वलत्तुग्मौलिः।
द्रवद् दैत्यवर्गा स्तुवत् सिद्धवर्गा त्वमम्बेशि दुर्गापि सर्गादिहीने।।12।।
पुरारातिदेहार्धभागा भवानी गिरीन्द्रात्मजात्वेन यैषा विभासि।
महायोगिवन्द्या महेशा सुनाथा महेश्यम्बिका तत्वतस्त्वन्मयैव।।13।।
लसत्कौस्तुभोरसिते व्योमनीले वसन्तीं च वक्षः स्थले कैटभारेः।
जगद्वल्लभां सर्वलोकैकनाथं श्रियं त्वां महादेव्यहं तामवैमि।।14।।
अजाद्रीड–गुहाब्जाक्षपोत्रीन्द्रकाणां महाभैरवस्यापि चिं वहन्त्यः।
विभो मातराः सप्त तद्रूपरूपाः स्फुरन्त्यस्त्वदंशा महादेवि ताश्च।।15।।
समुद्यद्दिवाकृत्सहस्राभभासा सदा सन्तताशेषविश्वावकाशे।
लसन्मौलिबद्धेन्दुलेखे सपाशांकुशाभीत्यभीष्टात्तहस्ते नमस्ते।16।।
प्रभा कीर्तिकान्ति दिवारात्रिसन्ध्याः क्रियाशा तमिस्रा क्षुधाबुद्धिमेधा।
धृतिर्वाङ्मतिः सन्मतिः श्रीचकान्तिस्त्वमेवेशि येऽन्ये च शक्तिप्रभेदाः।।17।।
हरे विन्दुनादैः सशक्त्याख्यशान्तैर्नमस्तेऽस्तु भेदप्रभिन्नैरभिन्नै।
सदा सप्तपाताललोकचलाब्धिगुहद्वीपपधातुस्वरादिस्वरूपे।18।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

नमस्ते नमस्ते समस्तस्वरूपे समस्तेषु वस्तुष्वनुस्यूतरूपे।
अतिस्थूलसूक्ष्मस्वरूपे महेशि स्मृते बोधरूपेऽप्यबोधस्वरूपे।19।।
मनोवृत्तिरस्तु स्मृतिस्ते समस्ता तथा वाक् प्रवृत्तिः स्तुतिः स्यान्महेशि।
शरीरप्रवृत्तिः स्तुतिः स्यान्महेशि शरीरप्रवृत्तिः प्रणामक्रिया स्यात्
प्रसीद क्षमस्व प्रभो सन्ततं मे।।20।।
ह्यल्लेखा— जपविधिसमर्चनविशेषाने तांस्तां स्तुतिमपि नित्यमादरेण।
याऽभ्यसेत् स खलु परां श्रियं परस्य धाम्नः।।21।।
।। इति भुवनेश्वरीस्तुतिः।।

## भ्रमराम्बाष्टकम्

चा×चल्यारुण—लोचना×चतकृपा—चन्द्रार्कचूडामणिम्
चारुस्मेरमुखां चराचराजगत् संरक्षणीं तत्पदाम्।
च×चच्चम्पक—नासिकाग्र—विलसन् मुक्तामणीर×जताम्
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये।।1।।

कस्तूरीतिलका×चतेन्दुविलसत् प्रोद्भासिफालस्थलीम्,
कर्पूरद्रवमिश्चूर्णखदिरा—मोदोल्लसद्वीटिकाम्।
लोलापाग—तरग्तैरधिकृपा—सारैर्नता नन्दिनीं
श्री शैलस्थलवासिनीं भगवतीं श्रीमातरं भावये।2।।

राजन्मत्तमराल—मन्दगमनां राजीवपत्रोक्षणाम्
राजीवप्रभवादिदेवमुकुटै राजत्पदाम्भोरूहाम्।
राजीवायतेन्दु—मण्डितकुचां राजाधिराजेश्वरीम्,
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये।।3।।

षटतारां गणदीपिकां शिवसतीं षड्वैरिवर्गापहाम्,
षट्चक्रान्तरसंस्थितां वरसुधां षड्योगिनीवेष्टिताम्।
षट्चक्रा×जत—पादुका×चतपदां षड्भावगां षोडशीम्,
श्री शैलस्थलं—वासिनीं भगवतीं श्रीमातरं भावये।।4।।

श्रीनाथादृत—पालितत्रिभुवनां श्रीचक्रसंसारिणीम्
ज्ञानासत्तमनोज—यौवन—लसद् गन्धर्वकन्यादृताम्।
दीनानामतिवेलभाग्यजननीं दिव्याम्बरालङ्कृताम्,
श्री शैलस्थलवासिनीं भगवतीं श्रीमातरं भावये।5।।

लावण्याधिकभूषितांगतिलकां लाक्षालसद्रागिणीम्,
सेवायातसमस्तदेववनितां सीमान्तभूषान्विताम्।
भावोल्लासवशीकृतप्रियतां भण्डासुरच्छेदिनीम्,
श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये।।6।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

धन्यां सोमविभावनीयचरितां धाराधरध्यामलाम्,
मुन्याराधनमेधिनीं सुमहतां मुक्तिप्रदानव्रताम्।
कन्यापूजन–सुप्रसन्नहृदयां का×चीलसन्मध्यमाम्,
श्रीशैलस्थवासिनीं भगवतीं श्रीमातरं भावये।।7।।

कर्पूरागुरु–कुङ्कुमाग्तिकुचां कर्पूरवर्णस्थिताम्,
कृष्टोत्कृष्टसुकृष्टकर्मदहनां कामेश्वरीं कामिनीम्।
कामाक्षीं करुणारसार्द्रहृदयां कल्पान्तरस्थायिनीम्,
श्रीशैलस्थवासिनीं भगवतीं श्रीमातरं भावये।।8।।

गायत्रीं गरुडध्वजां गगनगां गन्धर्वगानप्रियाम्,
गम्भीरां गजगामिनीं गिरिसुतां गन्धाक्षतालङ्कृताम्।
गगगौतमगर्गसन्नुतपदां गां गौतमीं गोमतीम्,
श्रीशैलस्थवासिनीं भगवतीं श्रीमातरं भावये।।9।।

## एकाक्षरी मन्त्रविधानं :–

1. विनियोग– ॐ अस्य श्री भुवनेश्वरीमन्त्रस्य शक्तिर्ऋषिर्गायत्रीच्छन्दो भुवनेश्वरी देवता हकारो बीजम्, ईकारः शक्तिः, रेफः कीलकं चतुर्वर्गफलसिद्धयर्थे जपे विनियोगः।

2. ऋष्यादिन्यासः:– शक्तिऋषये नमः (शिरसि)। गायत्रीच्छन्दसे नमः (मुखे)। श्रीभुवनेश्वरी देवतायै नमः (हृदये) हकारबीजाय नमः।(गुह्ये)। ईकारशक्तये नमः (पादयोः) रकारकीलकाय नमः (नाभौ)। चतुर्वर्गफलसिद्धयर्थे जपे विनियोगाय नमः। (सर्वांगे)। करादिषडंगन्यास– ह्रां, ह्री, ह्रूं, ह्रैं, ह्रौं, ह्रः । (इन छः बीजों से न्यास करें।)

3. ध्यानं– बालविद्युतिमिन्दुकिरीटां तुंगकुचां नयनत्रययुक्ताम्।
स्मेरमुखीं वरदाङ्कुशपाशाभीतिकरां प्रभजे भुवनेशीम्।।

तदनन्तर मानसोपचार पूजा करे त्र्यक्षरीमन्त्र– ह्रीं ॐ ह्रीं।

अष्टोत्तरशतनामस्तोत्रम्–
विनियोगः– अस्य श्रीभुवनेश्वर्यष्टोत्तरशतनामस्तोत्रस्य शक्तिर्ऋषिः। गायत्रीछन्दः। श्रीभुवनेश्वरीदेवता ममचतुवर्गसाधनार्थे पाठे विनियोगः।

*इसके न्यास, ध्यानादि एकाक्षरी मन्त्र के समान करें–*

महामाया महाविद्या महायोगा महोत्कटा।
माहेश्वरी कुमारी च ब्रह्माणि ब्रह्मरूपिणी।।1।।
वागीश्वरी योगरूपा योगिनी कोटिसेविता।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

जया च विजया चैव कौमारी सर्वमग्ला।।2।।
हिग्ला च विलासी च ज्वालिनी ज्वालरूपिणी।
ईश्वरी क्रूरसंहारी कुलमार्गप्रदायिनी।।3।।
वैष्णवी सुभगाकारा सुकुल्याकुलपूजिता।
वामाग वामचारा च वामदेवप्रिया तथा।।4।।
डाकिनी योगिनीरूपा भूतेशी भूतनायिका।
पद्मावती पद्नेत्राा प्रबुद्धा च सरस्वती।।5।।
भूचरी खेचरी माया मातगी भुवनेश्वरी।
कान्ता पतिव्रता साक्षी सुचक्षुः कुण्डवासिनी।
इन्द्राणि ब्रह्मचाण्डाली चण्डिका वायुवल्लभ।।4।।
सर्वधातृमयीमूर्तिर्जलरूपा जलोदरी।
आकाशी रणगा चैवा नृकपाल–विभूषण।।8।।
नर्मदा मोक्षदा चैव कामधर्माथदायिनी।
गायत्राी चाथ सावित्राी त्रिासन्ध्या तीर्थगामिनी।।9।।
अष्टमी नवमी चैत्रा दशम्येकादशी तथा।
पौर्णमासी कुहुरूपा तिथिमूर्ति–स्वरूपिण्ज्ञ।।10।।
सुरारिनाशकारी च उग्ररूपा च वत्सला।
अनला अर्धमात्राा च अरुणा पीतलोचना।।11।।
लज्जा सरस्वती विद्या भवानी पापनाशिनी
नागपाशधरा मूर्तिरगाधा धृतकुण्डला।।12।।
क्षत्राारूपा क्षयकरी तेजस्वनी शुचिस्मिता।
अव्यक्ता व्यक्तलोका च शम्भुरूपा मनस्विनी।।13।।
मातगी मत्तमातगी महादेवप्रिया सदा।
दैत्यघ्नी चैव वाराही सर्वशस्त्रमयी शुभा।।14।।

।।इत्यष्टोत्तरशतनामस्तोत्रं संनूर्णम्।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM